✧˖°*❋ ❋*°˖✧

# સુબ્રહ્મણ્ય અષ્ટકં કરાવલંબ સ્તોત્રમ્

# Subrahmanya Ashtakam Stotram (Karavalamba)

in Gujarati

✧˖°*❋ ❋*°˖✧

# સુબ્રહ્મણ્ય અષ્ટકં કરાવલંબ સ્તોત્રમ્

હે સ્વામિનાથ કરુણાકર દીનબંધો,
શ્રીપાર્વતીશમુખપંકજ પદ્મબંધો ।
શ્રીશાદિદેવગણપૂજિતપાદપદ્મ,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 1 ॥

દેવાદિદેવનુત દેવગણાધિનાથ,
દેવેંદ્રવંદ્ય મૃદુપંકજમંજુપાદ ।
દેવર્ષિનારદમુનીંદ્રસુગીતકીર્તે,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 2 ॥

નિત્યાન્નદાન નિરતાખિલ રોગહારિન્,
તસ્માત્પ્રદાન પરિપૂરિતભક્તકામ ।
શૃત્યાગમપ્રણવવાચ્યનિજસ્વરૂપ,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 3 ॥

ક્રૌંચાસુરેંદ્ર પરિખંડન શક્તિશૂલ,
પાશાદિશસ્ત્રપરિમંડિતદિવ્યપાણે ।
શ્રીકુંડલીશ ધૃતતુંડ શિખીંદ્રવાહ,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 4 ॥

દેવાદિદેવ રથમંડલ મધ્ય વેદ્ય,
દેવેંદ્ર પીઠનગરં દૃઢચાપહસ્તમ્ ।
શૂરં નિહત્ય સુરકોટિભિરીડ્યમાન,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 5 ॥

હારાદિરત્નમણિયુક્તકિરીટહાર,
કેયૂરકુંડલલસત્કવચાભિરામ ।
હે વીર તારક જયાડમરબૃંદવંદ્ય,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 6 ॥

પંચાક્ષરાદિમનુમંત્રિત ગાંગતોયૈઃ,
પંચામૃતૈઃ પ્રમુદિતેંદ્રમુખૈર્મુનીંદ્રૈઃ ।
પટ્ટાભિષિક્ત હરિયુક્ત પરાસનાથ,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 7 ॥

શ્રીકાર્તિકેય કરુણામૃતપૂર્ણદૃષ્ટ્યા,
કામાદિરોગકલુષીકૃતદુષ્ટચિત્તમ્ ।
ભક્ત્વા તુ મામવકળાધર કાંતિકાંત્યા,
વલ્લીસનાથ મમ દેહિ કરાવલંબમ્ ॥ 8 ॥

સુબ્રહ્મણ્ય કરાવલંબં પુણ્યં યે પઠંતિ દ્વિજોત્તમાઃ ।
તે સર્વે મુક્તિ માયાંતિ સુબ્રહ્મણ્ય પ્રસાદતઃ ।
સુબ્રહ્મણ્ય કરાવલંબમિદં પ્રાતરુત્થાય યઃ પઠેત્ ।
કોટિજન્મકૃતં પાપં તત્ક્ષણાદેવ નશ્યતિ ॥

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net